✧˖°*❋ ❋*°˖✧

# গণেশ কবচম্

## Ganesha Kavach: of sri Ganesh puran

in bengali

✧˖°*❋ ❋*°˖✧

# ॥ গণেশ কবচম্ ॥

এষোতি চপলো দৈত্যান্ বাল্যেপি নাশযত্যহো ।
অগ্রে কিং কর্ম কর্তেতি ন জানে মুনিসত্তম ॥ 1 ॥

দৈত্যা নানাবিধা দুষ্টাস্সাধু দেবদ্রুমঃ খলাঃ ।
অতোস্য কংঠে কিংচিত্ত্যং রক্ষাং সংবদ্ধুমর্হসি ॥ 2 ॥

ধ্যাযেত্ সিংহগতং বিনাযকমমুং দিগ্বাহু মাদ্যে যুগে
ত্রেতাযাং তু মযূর বাহনমমুং ষড্বাহুকং সিদ্ধিদম্ । ঈ
দ্বাপরেতু গজাননং যুগভুজং রক্তাংগরাগং বিভুং তুর্যে
তু দ্বিভুজং সিতাংগরুচিরং সর্বার্থদং সর্বদা ॥ 3 ॥

বিনাযক শ্শিখাংপাতু পরমাত্মা পরাত্পরঃ ।
অতিসুংদর কাযস্তু মস্তকং সুমহোত্কটঃ ॥ 4 ॥

ললাটং কশ্যপঃ পাতু ভ্রূযুগং তু মহোদরঃ ।
নযনে বালচংদ্রস্তু গজাস্যস্ত্যোষ্ঠ পল্লবৌ ॥ 5 ॥

জিহ্বাং পাতু গজক্রীডশ্চুবুকং গিরিজাসুতঃ ।
বাচং বিনাযকঃ পাতু দংতান্ রক্ষতু দুর্মুখঃ ॥ 6 ॥

শ্রবণৌ পাশপাণিস্তু নাসিকাং চিংতিতার্থদঃ ।
গণেশস্তু মুখং পাতু কংঠং পাতু গণাধিপঃ ॥ 7 ॥

স্কংধৌ পাতু গজস্কংধঃ স্তনে বিঘ্নবিনাশনঃ ।
হৃদযং গণনাথস্তু হেরংবো জঠরং মহান্ ॥ 8 ॥

ধরাধরঃ পাতু পার্শ্বৌ পৃষ্ঠং বিঘ্নহরশ্শুভঃ ।
লিংগং গুহ্যং সদা পাতু বক্রতুংডো মহাবলঃ ॥ 9 ॥

গজক্রীডো জানু জংঘো ঊরূ মংগলকীর্তিমান্ ।
একদংতো মহাবুদ্ধিঃ পাদৌ গুল্ফৌ সদাবতু ॥ 10 ॥

ক্ষিপ্র প্রসাদনো বাহু পাণী আশাপ্রপূরকঃ ।
অংগুলীশ্চ নখান্ পাতু পদ্মহস্তো রিনাশনঃ ॥ 11 ॥

সর্বাংগানি ময়ূরেশো বিশ্বব্যাপী সদাবতু ।
অনুক্তমপি যত্ স্থানং ধূমকেতুঃ সদাবতু ॥ 12 ॥

আমোদস্ত্বগ্রতঃ পাতু প্রমোদঃ পৃষ্ঠতোবতু ।
প্রাচ্যাং রক্ষতু বুদ্ধীশ আগ্নেয্যাং সিদ্ধিদাযকঃ ॥ 13 ॥

দক্ষিণস্যামুমাপুত্রো নৈঋত্যাং তু গণেশ্বরঃ ।
প্রতীচ্যাং বিঘ্নহর্তা ব্যাদ্বাযব্যাং গজকর্ণকঃ ॥ 14 ॥

কৌবের্যাং নিধিপঃ পাযাদীশান্যাবিশনংদনঃ ।
দিবাব্যাদেকদংত স্তু রাত্রৌ সংধ্যাসু যঃবিঘ্নহৃত্ ॥ 15 ॥

রাক্ষসাসুর বেতাল গ্রহ ভূত পিশাচতঃ ।
পাশাংকুশধরঃ পাতু রজস্সত্ত্বতমস্স্মৃতীঃ ॥ 16 ॥

জ্ঞানং ধর্মং চ লক্ষ্মী চ লজ্জাং কীর্তিং তথা কুলম্ । ঈ
বপুর্ধনং চ ধান্যং চ গৃহং দারাস্সুতান্সখীন্ ॥ 17 ॥

সর্বাযুধ ধরঃ পৌত্রান্ ময়ূরেশো বতাত্ সদা ।
কপিলো জানুকং পাতু গজাশ্বান্ বিকটোবতু ॥ 18 ॥

ভূর্জপত্রে লিখিত্বেদং যঃ কংঠে ধারযেত্ সুধীঃ ।
ন ভযং জাযতে তস্য যক্ষ রক্ষঃ পিশাচতঃ ॥ 19 ॥

ত্রিসংধ্যং জপতে যস্তু বজ্রসার তনুর্ভবেত্ ।
যাত্রাকালে পঠেদ্যস্তু নির্বিঘ্নেন ফলং লভেত্ ॥ 20 ॥

যুদ্ধকালে পঠেদ্যস্তু বিজযং চাপ্নুযাদ্ধ্রুবম্ ।
মারণোচ্চাটনাকর্ষ স্তংভ মোহন কর্মণি ॥ 21 ॥

সপ্তবারং জপেদেতদ্দনানামেকবিংশতিঃ ।
তত্তত্ফলমবাপ্নোতি সাধকো নাত্র সংশযঃ ॥ 22 ॥

একবিংশতিবারং চ পঠেত্তাবদ্দিনানি যঃ ।
কারাগৃহগতং সদ্যো রাজ্ঞাবধ্যং চ মোচযোত্ ॥ 23 ॥

রাজদর্শন বেলাযাং পঠেদেতত্ ত্রিবারতঃ ।
স রাজানং বশং নীত্বা প্রকৃতীশ্চ সভাং জযেত্ ॥ 24 ॥

ইদং গণেশকবচং কশ্যপেন সবিরিতম্ ।
মুদ্গলায চ তে নাথ মাংডব্যায মহর্ষযে ॥ 25 ॥

মহ্যং স প্রাহ কৃপযা কবচং সর্ব সিদ্ধিদম্ ।
ন দেযং ভক্তিহীনায দেযং শ্রদ্ধাবতে শুভম্ ॥ 26 ॥

অনেনাস্য কৃতা রক্ষা ন বাধাস্য ভবেত্ ব্যাচিত্ ।
রাক্ষসাসুর বেতাল দৈত্য দানব সংভবাঃ ॥ 27 ॥

**॥ ইতি শ্রী গণেশপুরাণে শ্রী গণেশ কবচং সংপূর্ণম্ ॥**

✧˖.....°*❋ ❋*°.....˖✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net